# पाठः - १ मिथिलाप्रवेशः

**आमुखम्**

आदिकाव्यं भवति रामायणम्। आदिकविः वाल्मीकिः। आदिकाव्येऽस्मिन् भाषायाः माधुर्य-ओज-प्रसादगुणसमन्वितत्वेन, रचनाशैल्याः सौन्दर्येण, भावानां मनोहारिण्या विवृत्या सर्वेषां रसानां समञ्जसमेलनं दृश्यते। अतः एवम् उच्यते।

यावत्स्थास्यन्ति गिरयः सरितश्च महीतले।

तावद्रामायणकथा लोकेषु प्रचरिष्यति।।

रामायणे सप्त काण्डाः सन्ति।

बालकाण्डः - दशरथपुत्राणां रामादीनां जननाद् आरभ्य सीतास्वयंवरानन्तरम् अयोध्याप्रत्यागमनपर्यन्ता कथा।

अयोध्याकाण्डः - रामाभिषेकचिन्तनादारभ्य रामस्य वनगमनपर्यन्तः कथाभागः।

आरण्यकाण्डः - वनवासकालादारभ्य सीतापहरणपर्यन्ता कथा।

किष्किन्धाकाण्डः- पम्पासरसः वर्णनादारभ्य सुग्रीवसख्यपर्यन्तः कथाभागः।

सुन्दरकाण्डः - हनूमतः सागरलङ्घनादारभ्य लङ्कादहनपर्यन्ता कथा।

युद्धकाण्डः - सेतुबन्धनादारभ्य रावणनिग्रहानन्तरं श्रीरामस्य अयोध्याप्रत्यागमनपर्यन्ता कथा।

उत्तरकाण्डः - जनापवादः, सीतापरित्यागः, सीतायाः वाल्मीकेराश्रमप्रवेशः,लवकुशजननम् अश्वमेधवेदिकायां लवकुशयोः आगमनं, रामायणालपनं, सीतायाः अन्तर्धानं च।

अस्मिन् काव्ये माकिं २४००० श्लोकाः सन्ति। बालकाण्डाद् उद्धृतः अयं पाठ्यांशः।

| आशयाः / धारणाः व्यवहाररूपणि | पठनप्रवर्तनानि/ पठनतन्त्राणि | पठनाधिगमः |
|---|---|---|
| कथां पठित्वा अर्थलेखनम्। | नूतनपदानां विवेचनं, अर्थलेखनम्। | पदानि अर्थान् च विवेचयति। |
| स्वभावरूपीकरणं, | कथायाःपठनेन स्वभावे सद्व्यतियानम्। | कथां जानाति। |
| ज्ञानसम्पादनं च। | पदच्छेदलेखनम्। | पदच्छेदं लिखति। |
| भाषणम्। | प्रश्नोत्तरद्वारा भाषापठनम्। | भाषायाःआशयमवगच्छति। |
| लेखनम्। | विभक्तिकार्यलेखनम्। | कथास्तम्भक्रमीकरणम्। |
| | कथास्तम्भान् क्रमीकरोति। | अव्ययपदानि परिचिनोति |
| कथनम्। | क्त्वान्तल्यबन्ततुमुन्नन्तपदानां विवेचनम्। | विवचयति च। |
| | | क्रियापदानि विवेचयति। |
| | कालवाचिनां क्रियापदानां परिचायनं लेखनं अवतारणं च। | |

उद्देश्यम् स्वभावरूपीकरणम्।

पठननैपुणी भाषणं, लेखनं, विवेचनं, कथनं च।

आधारग्रन्थसूची रामायणम्।

कालांशः १ २

**पठनप्रवर्तनम् १ - प्रश्नोत्तरकेलीचालनम्।**

**उद्देश्ये - प्रश्नवाचकशब्दान् परिचिनोति।**

**प्रयोगसामर्थ्यं सम्पादयति।**

**प्रक्रिया**

अध्यापकः कक्ष्यां प्रविश्य कथासन्दर्भस्य कञ्चित् अंशं चार्ट्पत्रे विलिख्य प्रदर्शयतु। कथाभागं छात्राणां भावनानुसारं लिखतु। अध्यापकस्य साहाय्येन कथां पूरयतु।

**उदा :** एकः ग्रामः अस्ति। तत्र एका बालिका। तस्याः पिता नास्ति, माता रोगेण पीडिता च। गृहे सर्वदा दारिद्र्यम् । एकदा सा समीपस्थं एकं मन्दिरं गच्छति। देवदर्शनानन्तरं बालिका मन्दिराद् बहिः आगच्छति। तदा पृष्टतः शब्दं श्रृणोति ............... । एतावत्पर्यन्तं अध्यापकः वदतु। अनन्तरं किमभवत्? शब्दः कः? कः आसीत्? एतादृशस्य प्रश्नस्य उत्तररूपेण कथाभागं पूरयतु।

छात्राः भावनानुसारं कथापूरणं कुर्वन्ति। लेखनसमये अध्यापकः अवश्यं साहाय्यं ददाति। कथां कक्ष्यायाम् अवतारयन्तु। अवतारणसमये अध्यापकः मूल्यनिर्णयं करोति।

ततःपाठभागं पठित्वा प्रश्नानां रचनायै छात्रान् निर्दिशतु।तदर्थं छात्राणां सङ्घद्वयं करोतु। अनन्तरं प्रश्नोत्तरक्रीडां चालयतु। एकस्य सङ्घस्य प्रश्नस्य उत्तरम् इतरः सङ्घः इति क्रमेण अवतारयतु। अवतारणावसरे अध्यापकः अधोदत्तसूचनानुसारं मूल्यनिर्णयं करोति।

मूल्यनिर्णयसूचिका:

उचिताः प्रश्नाः।

उचितानि उत्तराणि।

उचितः भाषाप्रयोगः।

यथा-

| | |
|---|---|
| आदिकविः कः? | वाल्मीकिः। |
| आदिकाव्यं किम्? | रामायणम्। |
| रामस्य पिता कः? | दशरथः । |
| दशरथः किमर्थं रामलक्ष्मणौ प्रेषयामास ? | यागरक्षार्थम्। |
| विश्वामित्रेण उपदिष्टौ मन्त्रौ कौ? | बला अतिबला नामकौ मन्त्रौ । |
| ताटका का? | अतिभयङ्करी राक्षसी । |
| शापमुक्ता ताटका कुत्र अगच्छत्? | देवलोकम्। |

महाराजः इति पदस्य विग्रहः कः? महान् च असौ राजा च।

कोऽपि इति पदस्य पदच्छेदः कः? कः अपि।

रामादयः काम्याश्रमात् कुत्र अगच्छन्? सिद्धाश्रमम्।

राक्षसाः किमकुर्वन्? आकाशात् रुधिरौघान् अवासृजन्।

रघुनन्दनः कः? रामः।

रामलक्ष्मणौ किमर्थं मिथिलां प्रति प्रस्थितौ? जनकमहाराजस्य यागं त्रैयम्बकं नाम शैवचापं च द्रष्टुं मिथिलां प्रति प्रस्थितौ।

ज्या इति पदस्य अर्थः कः ? मौर्वी।

का शिलारूपेण स्थिता? अहल्या।

रामः कथं अहल्यां शापाद् अमोचयत्? पादस्पर्शेन।

**प्रवर्तनम्** - २ **भूतकालक्रियापरिचायनम्।**

**उद्देश्यम्** - **लकारपरिचयं सम्पादयति।**

(भूतकालक्रियायाः विवेचनसामर्थ्यम्।)

**लकारपरिचयः।**

संस्कृतभाषायां प्रायेण द्विसहस्रं धातवः सन्ति। दश लकाराः च सन्ति। तेषु षट् लकाराः कालवाचकाः, चत्वारः प्रकारबोधकाः च।

लट् वर्तमाने लेट् वेदे भूते लुङ्लङ्लिटस्तथा।

विध्याशिषोस्तु लिङ्लोटौ लुट् लृङ्लृट् च भविष्यति।।

पुरुषप्रत्ययाः तिङ् इत्युच्यन्ते। धातवः परस्मैपदिनः आत्मनेपदिनः उभयपदिनः च भवन्ति। लकाराः सार्वधातुकाः आर्धधातुकाः इति द्विधा विभक्ताः। लट्, लङ्, लोट्, विधिलिङ् एते चत्वारः सार्वधातुकाः। अन्ये षट् आर्धधातुकाः।

भूतकालक्रियारूपाणि-

अकरोत् आसीत्, अभवन्, अपठताम्, अचलम् च।

वर्तमानकालक्रियारूपाणि - भवति, पठति, अस्ति, करोति, चलति च।

**प्रक्रिया-**

अध्यापकः छात्रान् पञ्च सङ्घान् कृत्वा पाठभागस्थाः पञ्च खण्डिकाः प्रत्येकं सङ्घाय दत्वा सम्यक् वाचनाय निर्दिशति। अनन्तरं खण्डिकायाः भूतकालक्रियापदानां चित्वा लेखनाय प्रेरयति। कक्ष्यायाम् अवतारणाय निर्दिशति च। अवतारणावसरे अध्यापकः शुद्धं पदं श्यामफलके लिखति। अन्ते टिप्पणीपुस्तके लेखनाय छात्रान् निर्दिशति।

अधोदत्तसूचनानुसारं मूल्यनिर्णयं च करोतु।

**मूल्यनिर्णयसूचिका :**

आशयावगमनम्।

कालबोधः।

क्रियायाः घटना।

पाठभागस्थानि भूतकालक्रियापदानि।

उपादिशत्। अतरन्। अवदत्। अकरोत्। अपतत्। अगच्छत्।
अगच्छन्। अवासृजन्। अपालयताम्। अवसत्। अमोचयत्।

**पठनप्रवर्तनम्** - ३

अव्ययपदचयनम्। पट्टिकाकरणम्।

उद्देश्यम् - अव्ययपदानां विवेचनसामर्थ्यम्।

प्रक्रिया -

अध्यापकः अधोदत्तवाक्यानि चार्ट्पत्रे विलिख्य कक्ष्यायां प्रदर्शयति।

बालः जलम् आनेतुं वापीं गच्छति।

बालः जलम् आनीय प्रत्यागच्छति।

छात्राः पठितुं विद्यालयं गच्छन्ति।

छात्राः पठित्वा प्रत्यागच्छन्ति।

रमा जलं पीत्वा स्वपिति।

रमा जलं पातुं महानसं प्रविशति।

माता देवालयं गन्तुम् इच्छति।

माता देवालयाद् आगत्य पचनं करोति।

चार्ट्पत्रस्थानां वाक्यानां सम्यक् वाचनाय निर्दिशति। वाचनानन्तरं रेखाङ्कितपदानां विशेषताम् अधिकृत्य चर्चां प्रचालयतु। पुनः

छात्रान् सङ्घान् कृत्वा पाठभागस्य वाचनाय प्रेरयति। पाठभागस्थानाम् अव्ययपदानां चयनाय निर्दिशति। एकैकः सङ्घः अवतारयतु। अवतारणसमये अध्यापकः मूल्यनिर्णयं करोतु।

**मूल्यनिर्णयसूचिकाः**

अर्थग्रहणम्।

अव्ययज्ञानम्।

पदबोधः।

| क्त्वान्तम् | तुमुन्नन्तम् | ल्यबन्तम् |
|---|---|---|
| श्रुत्वा | भक्षयितुम् | आगत्य |
| उषित्वा | द्रष्टुम् | व्यापाद्य |
| क्षिप्त्वा | | |

**पठनप्रवर्तनम् - ४ कथास्तम्भानां क्रमीकरणम्।**

**उद्देश्यानि** - **कथास्तम्भक्रमीकरणसामर्थ्यं सम्पादयति।**

**आशयम् अवगच्छति।**

**वाचनलेखनसामर्थ्यं सम्पादयति।**

**प्रक्रिया** अध्यापकः अधः प्रदत्तान् कथास्तम्भान् चार्ट्पत्रे विलिख्य प्रदर्शयतु। ततः पाठभागस्य सम्यक् वाचनाय छात्रान् प्रेरयतु। लघु प्रश्नान् पृच्छतु। ततः कथास्तम्भानां पौर्वापर्यक्रमेण लेखनाय निर्दिशतु। अवतारणसमये अध्यापकः मूल्यनिर्णयं करोतु।

**मूल्यनिर्णयसूचिका:**

आशयावगमः।

उचितया रीत्या क्रमीकरणम्।

आशयपूरणम्।

कथास्तम्भाः

मिथिलां प्रति प्रस्थितौ।

रुधिरौघान् अवासृजन्।

यागे समारब्धे राक्षसाः आगताः।

ताटकां अवधीत्।

संक्रुद्धा ताटका रामलक्ष्मणौ भक्षयितुम् उद्युक्ता।

राक्षसवधम् अकरोत्।

ताटकावनं प्रविवेश।

एकदा रामलक्ष्मणौ विश्वामित्रेण साकं गतौ।

कथास्तम्भान् क्रमीकृत्य श्यामफलके लिखति।

- एकदा रामलक्ष्मणौ विश्वामित्रेण साकं गतौ।
- ताटकावनं प्रविवेश।
- संक्रुद्धा ताटका रामलक्ष्मणौ भक्षयितुम् उद्युक्ता।
- ताटकां अवधीत्।
- यागे समारब्धे राक्षसाः आगताः।
- रुधिरौघान् अवासृजन्।
- राक्षसवधम् अकरोत्।
- मिथिलां प्रति प्रस्थितौ।

**प्रवर्तनपुटम्।**

चित्रं दृष्ट्वा नाम परस्परबन्धं च वदतु।

उद्देश्ये - कथापात्रपरिचायनम्। बन्धवाचकशब्दानां परिचायनम्।

प्रक्रिया अध्यापकः कथायाः सम्यक् पठनाय छात्रान् निर्दिशतु। अनन्तरं कथापात्राणां नामानि पृच्छति। तेषां स्वभावविशेषम् अधिकृत्य चर्चां प्रचालयतु। कथापात्राणाम् अभिनयाय प्रेरयतु। ततः छात्रान् सङ्घान् कृत्वा कथायाः नाटकरूपेण परिवर्तनाय निर्दिशतु। अध्यापकः आवश्यकं साहाय्यं ददातु। एकैकं सङ्घम् अवतारयितुम् अवकाशं यच्छतु। अवतारणावसरे मूल्यनिर्णयं च करोतु।



कथापात्राणि-

रामः　　　　　　　　दशरथः　　　　　　　　लक्ष्मणः

रामःदशरथस्य पुत्रः भवति.।

लक्ष्मणः दशरथस्य पुत्रः भवति.।

दशरथः रामस्य पिता भवति ।

दशरथः लक्ष्मणस्य पिता भवति ।

राम; लक्ष्मणस्य सोदरः भवति ।

## अधिकविस्तरः

कथायाः नाटकाविष्कारः

नाटकाविष्कारः

प्रथमः रंगः

(दशरथस्य राजधानी। सिंहासने दशरथः उपविशति। राजगुरुः वसिष्ठः सचिवाः च स्वस्वस्थानेषु उपविशन्ति। तदा राजर्षिः विश्वामित्रः आगच्छति।)

दशरथः - (उत्थाय)प्रणामः। स्वागतं महर्षे। उपविशतु।

विश्वामित्रः - स्वस्त्यस्तु। महाराज यज्ञरक्षार्थं भवतः ज्येष्ठपुत्रं रामं मया साकं प्रेषय।

दशरथः- (मौनं भजति) रामं न प्रेषयामि। अहम् आगच्छामि ।

(विश्वामित्रः बहिर्गन्तुम् इच्छति)।

वसिष्ठः - (दशरथं प्रति)महाराज! रामं प्रेषयतु। सः यज्ञरक्षार्थं पर्याप्तः कुमारः ।

(रामलक्ष्मणौ विश्वामित्रेण साकं गच्छतः।)

## *द्वितियः रंगः*

(नदीतीरेण विश्वामित्रः रामः लक्ष्मणःच सञ्चरति ।)

रामः - महर्षे! यागशाला समीपे अस्ति वा ?

महर्षिः - प्रक्षीणौ वा? क्षुत्पिपासाशमनार्थं बलाम् अतिबलां च उपदिशामि।

(उपदिशति)

(ते वनसमीपं प्रापुः.)

विश्वामित्रः - राम ! वनं पश्य। अत्र ताटकानाम राक्षसी वसति। अतिक्रूरा सा त्वया हन्तव्या।

रामः - यदाज्ञापयति भवान् ।(ज्याघोषं करोति।)

(क्रुध्दा ताटका प्रविशति।)

ताटका - युवामद्य मम आहारो भविष्यति।

रामः - अहम् अधुनैव त्वां हनिष्यामि ।(शरं पातयति।)

(शरेणाहता ताटका भूमौ पतति। शापान्मुक्ता सा रामं नमस्करोति।)

ताटका - अहं धन्यास्मि। गमनाय अनुमतिं ददातु।

रामः - तथास्तु।

## तृतीयः रंगः

(विश्वामित्रस्य यागशाला। यागः समारब्धः। रामलक्ष्मणौ यागसंरक्षणार्थं तिष्ठतः। सुबाहुमारीचौ अनुचरैः सहागत्य यागाग्नौ रुधिरौघान् अवासृजतः।

लक्ष्मणः - (रामं) ज्येष्ठ! पश्य। राक्षसाः आगच्छन्ति।

रामः - मा भैषीः। अहं तान् हनिष्यामि।

(रामः शीघ्रं शरम् आदाय राक्षसान् हन्ति।)

समाप्तः

# दैनकासूत्रणम्

| | | |
|---|---|---|
| कक्ष्या | - | सप्तमी। |
| पाठभागः | - | मिथिलाप्रवेशः। |
| व्यवहाररूपम् | - | कथा। |
| कालांशः | - | १२ |
| आशयः | - | कथां पठित्वा ज्ञानसम्पादनं स्वभावरूपीकरणं च। |
| पठनोपकरणानि | - | पाठपुस्तकं, हस्तपुस्तकं चार्ट्पत्राणि...........। |

| पठनप्रवर्तनानि<br>प्रश्नोत्तरकेलिः | प्रतिकरणानि<br>(प्रतीक्षितानि प्रतिकरणानि) |
|---|---|
| अध्यापकः कक्ष्यां प्रविश्य कथासन्दर्भस्य कञ्चित् | |
| अंशं वदतु, चार्ट्पत्रं प्रदर्शयतु। अवशिष्टं कथाभागं छात्राणां भावनानुसारं लिखतु। अध्यापकः साहाय्यं करोतु।<br><br>**उदाः-** एकः ग्रामः अस्ति। तत्र एका बालिका, तस्याः पिता नास्ति, माता रोगेण पीडिता च। गृहे सर्वदा दारिद्र्यम्। एकदा सा समीपस्थं एकं मन्दिरं गच्छति। देवदर्शनानन्तरं बालिका मन्दिरात् बहिःआगच्छति। तदा पृष्टतः शब्दं श्रृणोति ........... एतावत्पर्यन्तं अध्यापकः वदतु। अनन्तरं किमभवत्? शब्दः कः? कः आसीत्? एतादृशानां प्रश्नानाम् उत्तररूपेण कथाभागं पूरयतु। | |